S-III/1/2205/ 21

0/C

षष्ठसत्रार्द्धम्

प्रथमपत्रम्

दर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. वेदान्तो नाम किम्?

2. अनुबन्धचतुष्टयं किम्?

3. साधनचतुष्टयं किम्?

4. कानि नित्यकर्माणि?

अथवा

नित्यकर्मणां प्रयोजनं किम्?

5. वेदान्तशास्त्रस्य प्रयोजनं किम्?

6. कः अध्यारोपः?

7. ब्रह्मणः जगदभिन्ननिमित्तोपादानकारणत्वं कथम्?

8. तुरीयं चैतन्यं किम्?

अथवा

कः प्राज्ञः?

9. क्रमिकविकासवादः कः?

10. कः विज्ञानमयकोशः?

अथवा

कः प्राणमयकोशः?

11. भौतिकतावादः कः?

अथवा

कार्लमार्क्समहोदयेन विरचितं प्रसिद्धपुस्तकद्वयं किम्?

12. अपानो नाम किम्?

**अथवा**

किं नाम अज्ञानम्?

13. निदिध्यासनं नाम किम्?

14. तात्पर्यबोधकानि लिङ्गानि कानि?

15. निर्विकल्पकसमाधिः नाम किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. जॉनलॉकमहोदयस्य सिद्धान्तं प्रतिपादयत।

17. शमादिषट्कसम्पत्तिः का इत्युपपादयत।

18. पञ्चीकरणप्रक्रियां वर्णयत।

**अथवा**

स्थूलप्रपञ्चोत्पत्तिं निरूपयत।

19. पुत्रादीनाम् आत्मत्वं खण्डयत।

**अथवा**

'अहं ब्रह्मास्मीति' वाक्यार्थं विशदयत।

20. समाधेः अङ्गानि कानि? इति विचारयत।

**अथवा**

जीवन्मुक्तस्य लक्षणं निरूपयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** (1×20=20)

21. पाश्चात्यदर्शनस्य वैशिष्ट्यं वर्णयत।

**अथवा**

अज्ञानस्य लक्षणं प्रदर्श्य तस्य भेदं शक्तिद्वयं च यथाग्रन्थं प्रतिपादयत।

**अथवा**

तत्त्वमसीति वाक्यार्थं निरूपयत।